द्विरात्रः” कात्या० १५।६।२२। २व्रतभेदे न०। समा० द्विगुः अच् समा०। ३रात्रिद्वये न०।

**द्विरात्रीण** त्रि० द्वाभ्यां रात्रिभ्यां निर्वृत्तादि ख तस्य न लुक्। रात्रिद्वयसाध्ये पक्षे ठञ्। द्वैरात्रिक तत्रार्थे

**द्विराप** पुंस्त्री० द्विः द्विवारमापिबति आ+पा-क। हस्तिनि शब्दमा० तस्य शुण्डेन प्रथमपानोत्तरं मुखेन पानात् द्विवारपायित्वात् तथात्वम् स्त्रियां ङीष्।

**द्विराषाढ** पु० “माधवादिषु षट्केषु मासि दर्शद्वयं यदा। द्विराषाढः स विज्ञेयः शेते तु श्रावणेऽच्युतः” मिहिरोक्ते मिथुनस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तमासद्वये। स चाषाढमलमासे भवति यथा “मिथुनस्थो यदा भानुरमावस्याद्वयं स्पृशेत्। द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे। पौर्णमास्यद्वयं यत्र पूर्वाषाढाद्वयं स्पृशेत्। द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे” गारुडोक्ते मासभेदे च।

**द्विरुक्त** त्रि०द्विः द्विवारमुक्तः। १अभ्यस्ते द्वित्वप्राप्ते धात्वादौ २द्विवारं कथिते च।

**द्विरूढा** स्त्री द्विवारमूढा वह–कर्मणि क्त। द्विवारविवाहयुतायां पुनर्भूस्त्रियाम् हेमच०।

**द्विरेतस्** पु० द्वे रेतसी कारणमस्य। द्वाभ्यां पशुभ्यां रासभाश्वाभ्यां जाते १अश्वतरे गोऽजाभ्यां २जाते गर्दभे च “तएतमेकं पशुं द्वाभ्यां पशुभ्यां प्रत्यपश्यन् रासभं गोश्चावेश्च तद्यदेतमेकं पशुं द्वाभ्यां पशुभ्यां प्रत्यपश्यंस्तस्माद्देष एकः सन्द्विरेताः” शत०ब्रा० ६।१।१।२२। अत्र गर्दभस्य तथात्वमुक्तमश्वतरस्य तथात्वं च लोकप्रसिद्धम्।

**द्विरेफ** पु० द्वौ रेफौ वाचकशब्देऽस्य। द्विरेफयुक्तभ्रमरशब्दवाच्ये १मधुकरे अमरः २बर्वरे हेमच० “मधु द्विरेफः कुसुमैकपात्रे” द्विरेफमालाः सविशेषसङ्गाः” कुमा०।

**द्विर्वचन** न० द्विरुच्यते वच–कर्मणि ल्युट्। १द्विरुक्ते द्विःकथिते अभ्यस्ते धात्वादौ च “द्विर्वचनेऽचि” पा० “न पदान्तद्विर्वचनेत्यादि” पा०।

**द्विलक्षण** त्रि० द्वे लक्षणे प्रकारौ यस्य। प्रकारद्वययुते द्विधाभिन्ने “समानयानकर्म्मा च विपरीतस्तथैव च। तदात्वायतिसंयुक्तः सन्धिर्ज्ञेयो द्विलक्षणः” मनुः। द्विलक्षणः द्विप्रकारः” कुल्लू०।

**द्विवक्त्र** पु० द्वे वक्त्रे अस्य। १मुखद्वययुते राजसर्पे २दानवभेदे “एकवक्त्रो महावक्त्रो द्विवक्त्रः कालसन्निभः” हरिवं० २६२अ० नानादानवनामकथायुक्तौ।

**द्विवचन** न० द्वौ द्वित्वमुच्येते अनेन वच–करणे ल्युट् कर्मषष्ठ्या समासः। द्वित्वबोधके पा० परिभाषिते औभ्यामित्यादौ तसथस्प्रभृतौ च। “द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनमिति” पा०।

**द्विवज्रक** पु० द्विगुणितः वज्रः संज्ञायां कन्। षोडशकोणे गृहभेदे “वज्रोऽष्टास्रिर्द्विवज्रको द्विगुणः” वृ०सं० ५३अ०।

**द्विवर्ष** त्रि० द्वे वर्षे वयोमानमस्य ठक् तस्य लुक्। १द्विवर्षवयस्के गवादौ स्त्रियां टाप्। द्वे वर्षे अधीष्टो भृतो भूतो भावी वा ठञ् तस्य चित्तवति नित्यं लुक्। द्विवर्षं २सत्कृत्य नियोजिते ३भृते कर्मकरे ४स्वसत्तयाव्याप्ते ५भाविनि च। अचेतने तु “वर्षाल्लुक् च” पा० लुक् पक्षे ख ठञ् च। द्विवर्ष द्विवर्षीण अचेतने व्याध्यादौ भविष्यति तु “वर्षस्याभविष्यतीति” पा० उत्तरपदवृद्धिः। द्विवार्षिक द्विवर्षभूते धान्यादौ यागादौ च भविष्यति तु नोत्तरपदवृद्धिः। द्वैवार्षिक इत्येव। “ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः” मनुवाक्ये चित्तवत्यपि न लुक् आर्षत्वात् बोध्यम्। स्वार्थे क। द्विवर्षवयस्के त्रि० स्त्रियां टापि अतइत्त्वं द्विवर्षिका तत्रार्थे हेमच०

**द्विवाहिका** स्त्री द्विप्रकारं वाहयति वाहि–ण्वुल्। दोलायां शब्दमा० तस्या उभयपार्श्वयोः स्थाहढस्य वाहनात्तथात्वम्।

**द्विविंशतिकीन** न० द्वाविंशतिकमर्हति तत्परिमाणमस्य वा ख। द्वाविंशतिकार्हे तत्संख्यापरिमिते

**द्विविद** पु० १वानरभेदे स च रामसेनान्तर्गतः। “मैन्दश्च द्विविधश्चापि हनूमांश्चानिलात्मजः। जाम्बवानृक्षराजश्च सुग्रीवसचिवाः स्थिताः” भा०व० २७९अ०। द्वापरयुगीये सौभद्वारस्थे २वानरभेदे च “सौभद्वारे वानरेन्द्रो द्विविदो नाम नामतः” भा०उ० १२९अ०। “वानरौ द्वौ महावीर्यौ मैन्दोद्विविद एव च। विजितौ युद्धदुर्द्धर्षौ जाम्बवांश्चापराजितः” हरिवं० १७४अ०। “समुद्रस्योत्तरे तीरे द्विविदो नाम वानरः। ऐकाहिकज्वरं हन्ति तस्य नामानुकीर्तनात्”।

**द्विविध** त्रि० द्वे विधे अस्य। द्विप्रकारे “निकामतप्ता द्विविधेन वह्निना नभश्चरेणेन्धनसम्भृतेन च” कुमा०

**द्विविन्दु** पु० द्वौ विन्दू लेखनाकारेऽस्य। विसर्गे वर्णभेदे।

**द्विविस्त** त्रि० द्वे विस्ते अर्हति परिमाणमस्य वा आर्हीयः ठक् तस्य वा लुक्। विस्तद्वयार्हे तत्परिमिते पक्षे ठकोऽलुक्। द्वैविस्तिक तत्रार्थे। [ध्यायिनि